# Devaih Kritam 17 Shiva Stotram

# देवैः कृतं १७ शिवस्तोत्रम्

## Document Information

Text title : Devaih Kritam 17 Shiva Stotram

File name : devaiHkRRitaM17shivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | vAyavIyasaMhitA | uttarabhAga | adhyAya 8/32-36||

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 10, 2025

*sanskritdocuments.org*

Devaih Kritam 17 Shiva Stotram

# देवैः कृतं १७ शिवस्तोत्रम्

देवा ऊचुः ।
भगवन्केन मार्गेण पूजनीयोऽसि भूतले ।
कस्याधिकारः पूजायां वक्तुमर्हसि तत्त्वतः ॥ २६॥

ततः सस्मितमालोक्य देवीं देववरो हरः ।
स्वरूपं दर्शयामास घोरं सूर्यात्मकं परम् ॥ २७॥

सर्वैश्वर्यगुणोपेतं सर्वतेजोमयं परम् ।
शक्तिभिर्मूर्तिभिश्चाङ्गैर्ग्रहैर्देवैश्च संवृतम् ॥ २८॥

अष्टबाहुं चतुर्वक्त्रमर्धनारीकमद्भुतम् ।
दृष्ट्वैवमद्भुताकारं देवा विष्णुपुरोगमाः ॥ २९॥

बुद्ध्वा दिवाकरं देवं देवीं चैव निशाकरम् ।
पञ्चभूतानि शेषाणि तन्मयं च चराचरम् ॥ ३०॥

एवमुक्त्वा नमश्चक्रुस्तस्मै चार्घ्यं प्रदाय वै ॥ ३१॥

स्तोत्रम्। सिन्दूरवर्णाय सुमण्डलाय सुवर्णवर्णाभरणाय तुभ्यम् ।
पद्माभनेत्राय सपङ्कजाय ब्रह्मेन्द्रनारायणकारणाय ॥ ३२॥

सुरत्नपूर्णं ससुवर्णतोयं सुकुङ्कुमाद्यं सकुशं सपुष्पम् ।
प्रदत्तमादाय सहेमपात्रं प्रशस्तमर्घ्यं भगवन्प्रसीद ॥ ३३॥

नमश्शिवाय शान्ताय सगणायादिहेतवे ।
रुद्राय विष्णवे तुभ्यं ब्रह्मणे सूर्यमूर्तये ॥ ३४॥

यश्शिवं मण्डले सौरे सम्पूज्यैव समाहितः ।
प्रातर्मध्याह्नसायाह्ने प्रदद्यादर्घ्यमुत्तमम् ॥ ३५॥

प्रणमेद्वा पठेदेताञ्छ्लोकाञ्छ्रुतिमुखानिमान् ।
न तस्य दुर्लभं किञ्चिद्भक्तश्चेन्मुच्यते दृढम् ॥ ३६॥

इति शिवपुराणे वायवीयसंहितायां उत्तरखण्डे अष्टमाध्यायान्तर्गतं
देवैः कृतं शिवस्तोत्रं समाप्तम् ।

शिवपुराण । वायवीयसंहिता । उत्तरभाग २ । अध्याय ८/२६-३६ ॥

shivapurANa . vAyavIyasaMhitA . uttarabhAga 2 . adhyAya 8/32-36..

Proofread by PSA Easwaran

*Devaih Kritam 17 Shiva Stotram*
pdf was typeset on February 10, 2025

Please send corrections to *sanskrit@cheerful.com*